तत्र तद्गोलकं धृत्वा पुनस्तेनैव पूरयेत् ।
आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे ।
स्थालीं चुल्ल्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत् ॥
दिनान्यन्तरशून्यानि पञ्चवह्निं प्रदापयेत् ।
एवं तन्म्रियते तालं मात्रा तुल्यैकरक्तिका ॥
अनुपानान्यनेकानि यथायोग्यं प्रयोजयेत् ॥”
अन्यच्च ।
“तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम् ।
शोधितं कुरुते कान्तिं वीर्य्यवृद्धिं तथायुषम् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥
अन्यान्यविधं हरितालमारणम् । यथा, वैद्यक-
रसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।
“तालकं कणशः कृत्वा सुशुद्धं कुण्डिकान्तरे ।
चूर्णोदकेन संपिष्टमपामार्गजटोद्भवैः ॥
क्षारोदकैश्च संपिष्टमूर्द्ध्वाधो यावशूकजम् ।
चूर्णं दत्त्वा निरुध्याथ कुशाख्येन प्रपूरयेत् ॥
पुनर्मुखं निरुध्याथ चतुर्यामं क्रमाग्निना ।
पचेदेवं हि तच्चूर्णं कुष्ठादौ परियोजयेत् ॥”
मतान्तरम् ।
“अब्जलोनीजलैर्भाव्यं तालं द्वादशयामकम् ।
तथैव निम्बनीरेण ततश्चूर्णोदकेन च ।
प्रक्षाल्य शाल्मलीक्षारैर्द्विगुणैः खातमध्यगम् ।
विधाय कवचीयन्त्रं वालुकाभिः प्रपूरयेत् ।
द्वादशप्रहरं पक्त्वा स्वाङ्गशीतञ्च चूर्णयेत् ।
खादयेद्रक्तिकामेकां कुष्ठश्लीपदशान्तये ॥”
इति हरितालमारणम् ॥)
(तालमिव कायतीति । कै+कः ।) द्वार-
यन्त्रम् । इति हेमचन्द्रः । ४ । ७१ ॥ ताला
इति भाषा ॥ तुवरिका । इति शब्दरत्नावली ॥

तालकाभः, पुं, (तालकस्य हरितालस्य आभा
इव आभा यस्य ।) हरितवर्णः । इति हेम-
चन्द्रः । ६ । ३१ ॥ तद्वति, त्रि ॥

तालकी, स्त्री, (तालकस्य तालवृक्षस्य इयम् ।
तालक+अण्+ङीप् ।) तालसुरा । इति
त्रिकाण्डशेषः ॥ ताड़ी इति भाषा ॥

तालक्षीरकं, क्ली, (तालजातं क्षीरमिव । ततः
इवार्थे स्वार्थे वा कन् ।) तालसम्भूतयवक्षीरम् ।
इति राजनिर्घण्टः ॥

तालध्वजः, पुं, (तालो ध्वजो यस्य ।) बलदेवः ।
इति हलायुधः ॥ (यथा, महाभारते । ९ ।
५४ । १० ।
“नातिदूरं ततो गत्वा नगं तालध्वजो बली ।
पुण्यं तीर्थवरं दृष्ट्वा विस्मयं परमं गतः ॥”
पर्व्वतविशेषः । यथा, शत्रुञ्जयमाहात्म्ये ।१।३५२।
“शत्रुञ्जयो रैवतश्च सिद्धिक्षेत्रं सुतीर्थराट् ।
टङ्कः कपर्द्दी लौहित्यस्तालध्वजकदम्बकौ ॥”)

तालध्वजा, स्त्री, (तालस्तालवृक्षो ध्वजचिह्नं
यस्याः ।) पुरीविशेषः । यथा, क्रियायोगसारे ।
“अस्ति तालध्वजा नाम नगरी त्रिदिवोपमा ॥”

तालनवमी, स्त्री, (तालोपहारा नवमी । शाक-
पार्थिववत् समासः ।) भाद्रशुक्लनवमी । यथा,
“मासि भाद्रपदे या स्याच्छुक्लनवमी बहुलेतरा ।
तस्यां संपूज्य वै दुर्गामश्वमेधफलं लभेत् ॥”
इति संवत्सरकौमुदीधृतगरुड़पुराणवचनम् ॥
इयमेव तालनवमी ख्याता ॥ (अस्यां नवम्यां
सौभाग्यफलकाङ्क्षिणीभिः स्त्रीभिर्यथाविधानं
नारायणं लक्ष्मीञ्च संपूज्य व्रतकथा श्रोतव्या ।
तत्कथा यथा,—
“मेरुपृष्ठे सुखासीनं कृष्णं कमलया सह ।
उवाच मधुरं वाक्यं स्मितपूर्व्वं शुदाम्बिका ॥
शृणु मे वचनं देव ! स्त्रीणां सौभाग्यकारणम् ।
केन वा सुभगा चासीत् केन वा दुर्भगा भवेत् ॥
किं व्रतेन विमुच्येत किं व्रतेन फलं लभेत् ।
तन्मे ब्रूहि सुरश्रेष्ठ ! नारीणां कारणं ध्रुवम् ॥
श्रीभगवानुवाच ।
पूर्व्वं हि मम भार्य्ये द्वे सत्यभामा च रुक्मिणी ।
रुक्मिणी सुभगा साध्वी सत्यभामा च दुर्भगा ॥
तस्याः कर्म्मविपाकेन सौभाग्यमन्यथा गतम् ।
केनचिच्छापदोषेण सत्यभामा च दुर्भगा ॥
दुःखार्त्ता शोकसन्तप्ता रुदती बहुशो मुहुः ।
कियत्काले च सम्प्राप्ते व्रजन्ती च तपोवने ॥
अरण्ये विजने गत्वा कस्मिन्मुनिवराश्रमे ।
रुदित्वा च विधानेन सर्व्वं दुःखं न्यवेदयत् ॥
तच्छ्रुत्वा तु मुनिश्रेष्ठः प्रोवाच रुदतीं शुभाम् ।
भये पुत्त्रिणि ! मा रोदीः सौभाग्यं ते भविष्यति ॥
सत्यभामोवाच ।
दुःखं मे बहुशस्तात ! शरीरं दुर्भगं कथम् ।
कथ्यतां मुनिशार्दूल ! स्वामिसौभाग्यकारणम् ॥
मुनिरुवाच ।
भाद्रे मासि सिते पक्षे नवमी या तीथिर्भवेत् ।
तस्यां नारायणं लक्ष्मीं पूजयेच्च विधानतः ॥
सत्यभामोवाच ।
विधानं कीदृशं तस्य किं दानं किञ्च पूजनम् ।
तन्मे ब्रूहि मुनिश्रेष्ठ ! कारणं किन्तदुच्यताम् ॥
मुनिरुवाच ।
स्थण्डिले मण्डलं कृत्वा घटं तत्र निवेशयेत् ।
तत्र नारायणं लक्ष्मीं गन्धपुष्पादिनार्च्चयेत् ॥
नैवेद्येन सदा भक्त्या पूजयेत् भक्तवत्सलाम् ।
तालेन पूजयेत् देवीं तालेनैव विनिर्म्मितम् ॥
तस्यं तत् पिष्टकं दत्त्वा ब्राह्मणायोपपादयेत् ।
गन्धमाल्यैः समभ्यर्च्च्य विप्रहस्ते समर्पितम् ॥
स्वस्तीति ब्राह्मणो ब्रूयात् व्रतं साङ्गं समाचरेत् ।
एवं क्रमेण साध्वीभिः कर्त्तव्यमतियत्नतः ॥
नवमं वत्सरं यावत् मासि भाद्रपदे तथा ।
पुत्त्रपौत्त्रैः परिवृता सौभाग्यमतुलं भवेत् ॥
धनधान्यसमृद्धिञ्च अवैधव्यञ्च नित्यशः ।
अभीष्टफलमाप्नोति नवमीव्रतकारणात् ॥
सम्पूर्णे तु व्रते भूते प्रतिष्ठां तदनन्तरम् ।
विप्राय दक्षिणा देया सुभोज्यञ्च विधानतः ।
एवं कुरु सदा विप्रे ! शृणु भाषणमुत्तमम् ॥
तथा चक्रे च सा साध्वी मुनेर्व्वचनगौरवात् ।
व्रते सम्पूर्णतां याते केशवस्तामुपागतः ॥
उवाच प्रहसन् देवो वचनं मधुरं शुभम् ।
असौभाग्येन यद्दुःखं तत् ते सर्व्वं विनश्यतु ॥
सौभाग्यमतुलं प्राप्य यथा गौरी हरस्य च ।
शचीव पुरुहूतस्य रतीव मदनस्य च ॥
यथा नारायणे लक्ष्मीस्तथा त्वं भव शोभने ! ।
इति तस्यै वरं दत्त्वा गृहीत्वा तां पुरं ययौ ॥
इदं या कुरुते साध्वी व्रतं सा सुभगा भवेत् ।
एवं व्रतञ्च या नारी करोति धर्म्मतत्परा ॥
तस्याश्च भवने लक्ष्मीश्चञ्चला निश्चला भवेत् ।
जन्मान्तरे भवेत् साध्वी अवैधव्यं सदा पुनः ॥
पत्युश्च सुभगा साध्वी पुत्त्रपौत्त्रान्विता भवेत् ।
धनधान्यसमृद्धिञ्च ततो मोक्षमवाप्नुयात् ॥”
इति भविष्यपुराणोक्ततालनवमीव्रतकथा
समाप्ता ॥*॥ व्रतेऽस्मिन् नवफलानि दातव्यानि ।
तानि यथा,—
“पिण्डखर्ज्जूरं जातिञ्च एला चैव हरीतकी ।
नारिकेलं तथा पूगं रम्भापक्वफलन्तथा ।
तत्र मुख्यं प्रदातव्यं तालस्य फलमुत्तमम् ॥”*॥)

तालपत्त्रं, क्ली, (तालस्य पत्त्रमिव ।) ताड़ङ्कः ।
इत्यमरः । २ । ६ । १०३ ॥ तालवृक्षस्य पर्णञ्च ॥
(एतस्य व्यजनगुणा यथा,—
“तालपत्त्रमरुद्धृतः कोष्णो वातस्य शान्तिकृत् ।
निद्राकरः प्रीतिकरः शोषरोगविकारहा ॥
दाहपित्तश्रमग्लानिनाशनो भ्रमशान्तिकृत् ।
मधुरोऽतिश्रमघ्नः स्यादार्द्रत्वे कफकोपनः ॥”
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥)

तालपत्त्रिका, स्त्री, (तालपत्त्री+स्वार्थे कन् टाप्
ह्रस्वश्च ।) मुषली । तालमूली । इति राज-
निर्घण्टः ॥ (तालमूलीशब्देऽस्या विवृति-
र्ज्ञातव्या ॥)

तालपत्त्री, स्त्री, (तालस्य पत्त्रमिव पत्त्रमस्याः ।)
मूषिकपर्णी । इति मेदिनी । रे, २६३ ॥ (यथा,
“गोजी च पिप्ता सह तालपत्त्रा
ग्रन्थौ विधेयोऽनिलजे प्रलेपः ॥”
इति सुश्रुते चिकित्सितस्थाने १८ अध्याये ॥)

तालपर्णं, क्ली, स्त्री, (तालः खड्गमुष्टिरिव पर्णं-
मस्य ।) मुरानामगन्धद्रव्यम् । इति शब्द-
चन्द्रिका ॥

तालपर्णी, स्त्री, (तालस्य पर्णमिव पर्णमस्याः ।
ङीष् ।) मधुरिका । इति जटाधरः ॥ मुरा ।
इत्यमरः । २ । ४ । १२३ ॥

तालपुष्पकं, क्ली, (तालस्य पुष्पमिव पुष्पमस्य ।
कप् ।) प्रपौण्डरीकम् । इति शब्दरत्नावली ॥

तालभृत्, पुं, (तालं बिभर्त्ति ध्वजरूपेणेति । भृ
+क्विप् ।) बलदेवः । इति त्रिकाण्डशेषः ॥

तालप्रलम्बं, क्ली, (ताले तालवृक्षे प्रलम्बते इति ।
प्र+लम्ब+अच् ।) तालजटा । यथा,—
“तथा तालप्रलम्बञ्च रूक्षं चातरुजापहम् ॥”
इति राजवल्लभः ॥

तालमूलिका, स्त्री, (तालमूली+स्वार्थे कन् टाप्
ह्रस्वश्च ।) तालमूली । इत्यमरः । २।४।११६ ॥

तालमूली, स्त्री, (तालस्य मूलमिव मूलमस्याः ।
ङीष् ।) स्वनामख्यातवृक्षः । तत्पर्य्यायः ।
अर्शोघ्नी २ मुषली ३ ताली ४ खलिनी ५ ।